# सुरवाणीसमाराधकेभ्यः स्वागतम्



डा. कं.कादम्बिनी
सहायकाचार्या
रा. सं. विद्यापीठम्, तिरुपतिः

# अथ षष्ठीविभक्तिः

# सम्बन्धवाचकपदस्य षष्ठीविभक्तिः

यत्र सम्बन्धः दृश्यते, तत्र सम्बन्धवाचकपदस्य षष्ठीविभक्तिः भवति।

यथा

- कृष्णस्य अग्रजः बलरामः।
- रामस्य पुत्रः कुशः।
- उमा रमायाः सखी।
- सीतायाः पतिः रामः।

अभ्यासः - 1. दिलीपः कश्चन गृहस्थः। तस्य बान्धवाः अधः निर्दिष्टाः सन्ति। दिलीपस्य इतरेषां च सम्बन्धं वाक्यैः निर्दिशन्तु।



# भाववाचकशब्दानां योगे कर्तुः कर्मणश्च षष्ठीविभक्तिः

पठनम्, श्रवणम्, गमनम् इत्यादीनि भाववाचकानि ।

एतेषां योगे कर्तुपदस्य कर्मपदस्य च षष्ठीविभक्तिः भवति।

यथा

रामस्य आगमने विलम्बः नास्ति। (कर्तृपदस्य)
रामस्य दर्शनेन सीता सन्तुष्टा। (कर्तृपदस्य)
गीतस्य श्रवणेन अहं सन्तुष्टः। (कर्मपदस्य)
पुस्तकस्य अध्ययनेन ज्ञानं वर्धते। (कर्मपदस्य)

यथा –

> (गीतं) ---------------- श्रवणेन अहं सन्तुष्टः ।
> गीतस्य श्रवणेन अहं सन्तुष्टः ।

१. (योग्यः) ------------------- (आहारः) ------------------- सेवनेन शक्तिः वर्धते ।

२. (ग्रन्थाः) -------------- अध्ययनम् एव (सरस्वती) -------------- आराधनम् ।

३. सः (विषयाः) ------------------- प्रतिपादनं सम्यक् कृतवान् ।

४. अद्य प्रातःकाले (कार्यक्रमः) ------------------- उद्घाटनं जातम् ।

५. भवान् शीघ्रं (पुस्तकानि) ---------------------- अन्वेषणं करोतु ।

६. (वस्त्रादीनि) ------------------------------ दानेन पुण्यं लभ्यते ।

७. पण्डितः सदा (ग्रन्थाः) --------------------- परिशीलनं करोति ।

८. कर्मकरी (पात्राणि) --------------- प्रक्षालनं कृत्वा गृहं गच्छति ।

९. कर्णः निर्धनाय (कवचं) --------------- (कुण्डलं) --------------- च दानं कृतवान् ।

१०. अहं (मूल्याङ्काः) ---------------- (नाणकानि) ---------------- च सङ्ग्रहं करोमि ।

III. अध्यापकः कस्य/कस्याः/केषां/कासां प्रतिभां दृष्टवान्/न दृष्टवान् इति अधः निर्दिष्टम् अस्ति। तदाधारेण वाक्यानि रचयन्तु।

| | ✓ | X |
|---|---|---|
| १. | सः | एषः |
| २. | सा | एषा |
| ३. | भवान् | भवती |
| ४. | एताः | एते |
| ५. | ते | ताः |
| ६. | अहम् | वयम् |
| ७. | भवत्यः | भवन्तः |

# क्रियापदानां विभज्यप्रयोगे कर्मणः षष्ठीविभक्तिः

यथा

सः पुस्तकस्य अध्ययनं(पुस्तकाध्ययनं) करोति।

अध्यापकः गद्यस्य पाठनं(गद्यपाठनं) करोति।

आचार्यः शब्दानाम् अनुशासनं(शब्दानुशासनं) करोति।

# षष्ठीविभक्तेः प्रयोगः -

- सम्बन्धवाचकपदस्य
- भाववाचकशब्दानां योगे कर्तुः कर्मणश्च
- क्रियापदानां विभज्य प्रयोगे कर्मणः च षष्ठीविभक्तिः भवति।

धन्यवादाः